# P.G. 1st Semester - 2018
# SANSKRIT
## Paper : MSNSCCT101

Full Marks : 40 Time : 2 Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## MODULE-I

1. प्रश्न**द्वयं** समाधेयं देवभाषया देवनागरीलिप्या च : 2×2=4

   क) ऋग्वेदेस्य (१/१) अग्निसूक्तस्य कस्तावदृष्टा ? सूक्तेऽस्मिन् कति मन्त्राः सन्ति ?

   ख) "मर्यायेव कन्या शश्वचै ते"—इति मन्त्रांशस्य द्रष्टा कः ? कस्मिन् च सूक्ते सम्पठ्यते मन्त्रांशोऽयम् ?

   ग) पुरुषसूक्तदिशा चन्द्रमाः कुतोऽजायत ? विराट्पुरुषस्य मुखं किमासीत् ?

   घ) "तस्माद्धान्यन्न परः किञ्चनास"—इति मन्त्रांशस्य देवता का ? कुत्र च संलक्ष्यते मन्त्राशोऽयम् ?

2. प्रसङ्गपुरस्सरेण ऋषिच्छन्दोदेवतानां नामानि निर्दिश्य संस्कृतेन मन्त्रस्**यैकस्य** व्याख्या करणीया : 6×1=6

   क) अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥

   ख) नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
   किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥

3. ऋग्वेदीयपुरुषसूक्तानुसारं सृष्टिप्रक्रिया प्रतिपाद्यताम् । 10

   **अथवा**

   अग्निः कस्य स्थानस्य देवता ? अग्निसूक्तमाश्रित्य (१/१) अग्नेर्वैशिष्ट्यं निरूप्यताम् ।

## MODULE-II

4. प्रश्न**द्वयं** समाधेयं देवभाषया देवनागरीलिप्या च : 2×2=4

   क) अथर्ववेदीयकालसूक्तस्य (१९/५३) ऋषिः कः ? सूक्तेऽस्मिन् कति मन्त्राः सन्ति ?

   ख) शिवसंकल्पसुक्तानुसारं ज्योतिषां ज्योतिरेकं किम् ? केन च अपसः मनीषिणः धीराश्च कर्माणि कुर्वन्ति ?

   ग) "माता भूमिः पुत्रोऽहं पृथिव्याः"—इति मन्त्रांशोऽयं कुत्र समुपलभ्यते ? कस्तावन्मन्त्रांशस्यास्य द्रष्टा ?

   घ) शतपथब्राह्मणनुसारं पञ्चमहायज्ञानां नामानि लिख्यन्ताम् ।





http://www.wbstudy.com

5. सप्रसङ्गपुरस्सरेण संक्षेपेण संस्कृतभाषया व्याख्यायताम् : 6

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥

**अथवा**

कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ॥

6. अथर्ववेदीयकालसूक्तमाश्रित्य कालस्य दार्शनिकविवेचनं संक्षेपेण समुपस्थाप्यताम् । 10

**अथवा**

पञ्चमहायज्ञेषु कस्याप्यैकस्य स्वरूपं माहात्म्यञ्च संक्षेपेण निरूप्यताम् ।

———————



http://www.wbstudy.com